International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(1): 165-167
© 2020 IJSR
www.anantaajournal.com
Received: 25-11-2019
Accepted: 30-12-2019

**हरेश्वर पाण्डेय**
रूपी वगही, वगहीबाजार, गोपालगंज
बिहार, भारत

**Corresponding Author:**
**हरेश्वर पाण्डेय**
रूपी वगही, वगहीबाजार, गोपालगंज
बिहार, भारत

# पाणिन्यष्टाध्यायां पंचसंधिसूत्राणां तात्पर्यम्

**हरेश्वर पाण्डेय**

**सारांश :**
स्वरसन्धिः अच्सन्धिर्वा पञ्चभेदाः—दीर्घसन्धिः, गुणसन्धिः, वृद्धिसन्धिः, यणसन्धिः, अयादिसन्धिश्चेति भेदात्। अत्रैव पूर्वरूपम्,, पररूपम्, प्रकृतिभावश्चैते भेदा अपि समाविशन्ति।

**कूटशब्दः** दीर्घसन्धिः, गुणसन्धिः, वृद्धिसन्धिः, यणसन्धिः, पूर्वरूपम्,, पररूपम

## प्रस्तावना

संस्कृतभाषायां वर्णानामतिशयितः सन्निधिः सन्निधानं वा 'संहिता' इत्युच्यते इति भगवता पाणिनिना अष्टाध्याय्याम्प्रतिपादितम् ''परः सन्निकर्षः संहिता''1 इति। संहिता सन्धिरित्यनर्थान्तरम्। जनेषु सन्धिविषये भ्रान्तिर्वर्तते यद् वाक्ये सन्धिर्वैकल्पिकः। ते वदन्ति—

''संहितैकपदे नित्या नित्या धातूपसर्गयोः।
नित्या समासे वाक्ये तु सा विवक्षामपेक्षते।।'

अत्रेदं तात्पर्यम् यत् नियमोऽयं सीमाबद्ध इति। निर्धारितसीमायामेव सन्धिर्वाक्ये वैकल्पिकः। संहिता स्वरवर्णानां व्यञ्जनवर्णानां, अयोगवाहानां (विसर्गाणाम्) परस्परं सहिता स्वरवर्णानां व्यञ्जनवर्णानां, अयोगवाहानां (विसर्गाणाम्) परस्परं सन्निधानम्। किन्तु यत्र विरामो नास्ति, तत्रैव सन्धिनियमाः, प्रवर्तन्ते। विरामे सन्धिर्न भवति। यथा—

''मित्र, एहि, अनुगृहाणेमं जनम्।''

इति वाक्ये, ''मित्र' ''एहि' इति पदयोर्मध्ये विरामः, अतः सन्धिर्न भवति। किन्तु ''अनुगृहाण इमम्'' इत्यत्र सन्धिर्भवति ''अनुगृहाणेमम्'' इति पद्ये तु सन्ध्यवसरे सन्धिर्न विधीयेत चेत् ''विसन्धि' इत्याख्यो दोषो जायते। तथा चोक्तम् काव्यादर्शे—

''न संहितां विवक्षामीत्यसन्धानं।
पदेषु यत्तद् विसन्धीति निर्दिष्टम्।।''

संस्कृतव्याकरणशास्त्रे सन्धिः मुख्यतस्त्रिधा–(1) स्वरसन्धिः, (2) व्यञ्जनसन्धिः, विसर्गसन्धिश्चेति। स्वादिसन्धिः, पृथग् रूपेण सिद्धांतकौमुद्यां निर्दिष्टः। किन्तु स्वादिसन्धेः हलसन्धौ, विसर्गसन्धो वा समावेशः कर्तु शक्यते। स्वरसन्धिः शास्त्रे अच्सन्धिरूच्यते। अचः स्वराः। माहेश्वरसूत्रेषु प्रत्याह्रियन्ते संक्षिप्यन्ते वर्णा अनेनेति प्रत्याहर इति नियमात् ''अ इ उ ण्' इत्यारभ्य ''ऐ औ च्'' इति यावत् सर्वेऽपि वर्णा' 'अच' नाम्नोच्यन्ते। भगवता पतञ्जलिनोक्तम् [2]–

''स्वयं राजन्त इति स्वराः, अन्वग् भवति व्यञ्जनम्'' इति।

**अच्सन्धौ दीर्घसन्धिः**–अच्सन्धौ दीर्घसन्धिः प्रथमो भेदः। अत्रेदं ज्ञातव्यम् यद् दीर्घस्य कृते परस्याऽचः सावर्ण्यमपेक्षितम्। ''तुल्यास्यप्रयत्न सर्वणम्'[3] इति शास्त्रानुसारेण यस्य वर्णजालस्य परस्परमुच्चारणस्थानम्, आभ्यन्तरप्रयत्नश्चैतद् द्वयं तुल्यं स्यात् तत् सवर्णसंज्ञं भवति। अत्र व्याकरणशास्त्रे अकारः प्रयोगे संवृतः, किन्तु प्रक्रियादशायां विवृतः[4] अतः अ, आ, आ, अ इत्यत्राऽपि दीर्घसन्धिर्भवति। ''अकः सवर्णे दीर्घः''[5] इति शास्त्रानुसारेण अकः (अ इ उ ऋ लृ इत्येतेभ्यो वर्णेभ्यः) सवर्णेऽचि परतः पूर्वपरयोः स्थाने दीर्घ एकादेशो भवति। यथा–

सुर + अरिः = सुरारिः (अ+ अ=आ)

हिम +आलयः = हिमालयः (अ+आ=आ)

दया + अर्णवः = दयार्णवः (आ+अ=आ)

विद्या + आलयः = विद्यालय (आ+आ=आ)

गिरि + इन्द्रः = गिरीन्द्रः (इ+इ=ई)

क्षिति + ईशः = क्षितीशः (इ+ई=ई)

सुधी + इन्द्रः = सुधीन्द्रः (ई+ई=ई)

श्री + ईशः = श्रीशः (ई+ई=ई)

गुरू +उपदेश = गुरूपदेशः (उ+उ=ऊ)

लघु +ऊर्मिः = लघूर्मिः (उ+ऊ=ऊ)

वधू +उत्सवः = वधूत्सवः (ऊ+उ=ऊ)

पित + ऋणम् = पितृणम (ऋ+ऋ=ऋ)

''ऋलृवर्णयोर्मिथः सावर्ण्य वाच्यम्'' [6] इति वार्तिकानुसारेण 'ऋ' वर्णाद्' 'लृ' वर्णाद् वा ऋ वर्णे वा परतः उभयोः स्थानयोः ऋ वर्णः लृ वर्णो वा भवितुमर्हति। यथा–

होतृ + ऋकारः = होतृकारः, होतृ ऋकारः।

होतृ + लृकारः = होत् लृकारः, होतृ लृकारः।

**अच्सन्धौ गुणसन्धिः**

व्याकरणशास्त्रे ':'अदेङ् गुणः''[7] इति सूत्रेण तद्भावितानाम् अतद्भावितानाम्, च अ ए ओ वर्णानां गुणसंज्ञा भवति। 'आदगुणः' [8] इति सूत्रेण अवर्णात् अचि परतः पूर्वपरयोः स्थाने गुण एकादेशो भवति। यथा'–

डप + इन्द्रः = उपेन्द्रः (अ+इ=ए)

सुर + ईशः = सुरेशः (अ+ई=ए)

तथा + इति = तथेति (आ+ई=ए)

रमा + ईशः = रमेशः (आ+ ई=ए)

हित + उपदेशः = हितोपदेशः (अ+ उ=ओ)

गङ्गा + उद्कम् = गङ्गोदकम्: (अ+ऊ=ओ)

पीन + ऊरूः = पीनोरूः (अ+ऊ=ओ)

देव + ऋषिः = देवर्षिः (अ+ ऋ= अर् [9])

महा + ऋषिः = महर्षिः (आ+ऋ=अर्)

तव +लृकारः = तवल्कारः (अ+ लृ=अल्) इत्यादि

**अच्सन्धौ वृद्धिसन्धिः**

व्याकरणशास्त्रे 'वृद्धिरादैच'[10] इति सूत्रेण तद्भावितानाम् (सूत्रेण विहितानाम्) अतद्भावितानां च आदैचाम् ( आ ऐ औ वर्णानां) वृद्धिसंज्ञा भवति। 'वृद्धिरेचि'[11] इति सूत्रेण अवर्णाद् एचि (ए ओ ऐ औ इत्येषु वर्णेषु) परतः पूर्वपरयोः स्थाने वृद्धिरेकादेशो भवति। एकारे, ऐकारे वा परतः 'ऐ' इति वृद्धिः, ओकार औकार वा परशः ''औ'' इति वृद्धिभवति। उदाहरणानि तावत्–

अद्य + एव = अद्यैव (अ+ए–ऐ)

देव + ऐश्वर्यम् = देवैश्वर्यम् (अ+ऐ–ऐ)

तथा + एव = तथैव (आ+ए–ऐ)

विद्या + ऐश्वर्यम् = विद्यैश्वर्यम् (आ+ऐ–ऐ)

तण्डुल + ओदनम् = तण्डुलौदनम् (अ+ ओ–औ)

महा + औषधिः = महौषधिः (आ+ औ–औ)

**अचसन्धौ यणसन्धिः**

**''इको यणचि''[12] इति** सूत्रेण अचि परतः इकः स्थाने यण् भवति। ह्रस्वाद् 'इ' वर्णाद् 'ई' वर्णाद्वा ऽन्यस्मिन् स्वरे परतः इवर्णस्य स्थाने 'य' आदेशो भवति। 'उ' वर्णाद् (ह्रस्वाद्, दीर्घाद्वा) इवर्णस्य स्थाने 'य' आदेशो भवति। 'उ' आदेशो भवति। 'ऋ' वर्णाद् अन्यस्मिन् स्वरे परतः 'ऋ' वर्णस्य 'र' आदेशो भवति। यथा–

यदि + अपि = यद्यपि। (इ+अ–य)

सुधी + उपास्यः = सुध्युपास्यः। (ई+ उ–यु)

(''अनाचि [13] च'' इति द्वित्वे सुद्ध्युपास्यः)।

नदी + उद्कम् = नद्युदकम्। (ई+उ–यु)

इति + आह = इत्याह। (इ+आ–या)

प्रति + एकम् = प्रत्येकम् (इ+ए–ये)

मातृ + अनुमतिः = मात्रनुमतिः। (ऋ+अ–र)

अनु + अयः = अन्यवः। (उ+अ–व)

मधु + अरिः = मद्ध्वरिः (उ+अ–व)

गुरू + आदेशः = गुर्वादेशः (उ+आ–वा)

शिशु + ऐक्यम् = शिश्वैक्यम् (उ+ऐ–वै)

वधू +आदेशः = वध्वादेशाः (ऊ+आ–वा)

पितृ +उपदेशः = पित्रुपदेशः (ऋ+उ–रू)

धातृ + अंशः = धात्रंशः (ऋ + अं = रं)

लृ + आकृतिः = लाकृतिः (लृ+आ–ला)

**अच्सन्धौ अयादिसन्धिः**

''एचोऽयवायावः''[14] इति सूत्रेणाऽचि परतः एचः स्थाने क्रमशः अय्, अव्, आय्, आव् इत्येते आदेशा भवन्ति। एकारस्य अय्, ओकारस्य अव्, ऐकारस्य आय्, औकारस्य च आव् आदेशो भवति। यथा–

हरे +ए हरये (ए+ए–अय् ए)

शे +अनम् शयनम् (ऐ+अ–अय्)

**ने** + अनम् नयनम् (ए+अ–अय्)

नै + अकः = नायकः(ऐ+अ–आय्)

भो +अति = भवति (ओ+अ–अव्)

औपगो + अः = औपगवः (ओ+अ–अव्)

वटो + ऋक्षः = वटवृक्षः (ओ'+ ऋ–अव् ऋ)

पौ + अकः = पावकः (औ+अ–आव्)

पदान्ताभ्यां य्वाभ्यां पूर्व अवर्णः स्यात् चेदचि परतः ''लोपः शाकल्यस्य'' [15]

इति सूत्रेण शाकल्यमतेन य्वोर्लोपो भवति। यथा–

हरे+एहित्र हरयेहि, हर एहि (लोपपक्षे)। विष्णो+ इह– विष्णविह, विष्ण इह (लोपपक्षे)। इत्यादि। ''पूर्वत्रासिद्धम्''[16] इति लोपशास्त्रस्याऽसिद्धत्वान्न स्वरसन्धिः (विष्ण इह इत्यत्र, हर एहि इत्यत्र च ) ''वान्तो यि प्रत्यये''[17] इति सूत्रेण ओकाराद् औक्राराद् वा यकारादौ प्रत्यये परतः वान्तादेशः– ओकारस्य 'अव्', औकारस्य च 'आव्' आदेशो भवति। यथा– गो + य (यत्) –गव्य म् 'गो' शब्दाद् यूति शब्दे परे अध्वपरिमाणेऽर्थे वान्तादेशो भवति।[18] यथा–गो+यूतिः– गव्यूतिः। 'धातोस्तन्निामित्तस्यैव[19]'' इति सूत्रेण यकारादौ प्रत्यये परतः औकारस्य औकारस्य च धातोस्तन्निमित्तस्यैव वान्तादेशो भवति। यथा–लो+यम्–लव्यम्। भो+ यम्–भाव्यम्।

सा च सन्धिः पञ्चधा सन्ति–1. अच् सन्धिः (स्वर सन्धिः), 2. प्रकृति भाव सन्धिः, 3. हल्सन्धिः, 4. विसर्गसन्धिः, 5. स्वादिसन्धिश्चेति।

1. अच्सन्धौ स्वराणां परस्परं सन्निकर्षो भवति। यथा–दधि+ अत्र = दध्यत्र। मधु+अत्र = मध्वत्र। रमा+ ईशः = रमेशः। कृष्ण+ ऋद्धि = कृष्णर्द्धिः । राम+आनन्दः = रामानन्दः इत्येवमादयः सन्ति।
2. प्रकृतिभावसन्धौ स्वराणां स्वभावस्थितिर्नियिम्यते। यथा–एहि कृष्ण 3 अत्र गौश्चरति। सुश्लोक ऊ इति। गें+अमू। अभी ईशाः इत्येवमादयः।
3. हल् सन्धौ हल् वर्णानां सन्निकर्षो भवति। यथा–शंनि+जयः= शँञ्जियः। प्रश्+तः = प्रश्नः। विश्+न= विश्नः। तत् +टीका = तट्टीका। उत्+ स्तम्भनम् =उत्तम्भनम्। सन्+शम्भुः = सञ्च्छम्भुः मा+ छिदत् = माच्छिदत् इत्येवमादयः।
4. विसर्गसन्धौ विसर्गस्य सन्निाकर्षो व्याख्यायते, विसर्गस्यो कानि कानि रूपाणि परिवर्तन्ते इति विविच्यते। यथा–कः त्सरूः। धनाधनः क्षोभणः। इह यथायथं सत्वं जिह्वामूलीयश्च न। नमः + करोति= नमस्करोति। अविः कृतम् = अविष्कृतम्। मुहुः+ कामा = मुहुःकामा। अयः : कारः = अयस्कारः। अधः: पदम्= अधस्पदम् इत्येवमादयः।
5. स्वादिसन्धौ स्वादिविभक्तिभिर्योगे सन्निकर्षो व्यज्यते । यथा– शिवः+ अर्ध्यः = शिवोऽर्चयः। देवाः + अत्र = देवा अत्र। एहि सुस्रोत उ अत्र स्नाहि।। देवाः +इह = देवा इह । एषः + अत्र = एषोऽत्र। सः एषः दशरथी रामः = सैष दाशरथीरामः इत्येवमादयः सन्ति।

**संदर्भाः**


1. अष्टाध्यायी, 1,4,109 ।
2. पतञ्जलि–व्याकरणमहाभाष्यम्, 1.1 आ, 2।
3. पाणिनि–अष्टाध्यायी, 1.1.9।
4. भट्टोजिदीक्षित–वैयाकरणसिद्धान्तकौमुदी, संज्ञाप्रकरणम्।
5. पाणिनि–अष्टाध्यायी, 6.1.101।
6. कात्यायन–वार्त्तिकम्, 1.1.9।
7. पाणिनि–अष्टाध्यायी– 1.2.1।
8. तदेव, 6.1.87।
9. पाणिनि–अष्टाध्यायी, 1.1.5.1।
10. तदेव, 1.1.1।
11. तदेव, 6.1. 88 ।
12. पाणिनि–अष्टाध्यायो, 6.1.77।
13. तदेव, 8.4.47।
14. तदेव, 6.1.78।
15. पाणिनि–अष्टाध्यायी, 8.3.19।
16. तदेव, 8.2.1।
17. तदेव, 6.1.79।
18. गोर्युतो अध्वपरिमाणे च वाच्यम्– कात्यायन– कार्तिकम् 6.1.79।
19. पाणिनि– अष्टाध्यायी, 6.1.70।